# ardhanArIshvarasahasranAmastotram

# અર્ધનારીશ્વરસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : ardhanArIshvarasahasranAmastotram 1

File name : ardhanArIshvarasahasranAmastotram.itx

Category : sahasranAma, shiva, devii, pArvatI

Location : doc_shiva

Proofread by : PSA Easwaran

Description-comments : See corresponding nAmAvalI, From https://archive.org/stream/S.V.RadhakrishnaS

Sri Sivanama_Manjari Part 2 p 273

Latest update : May 30, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# અર્ધનારીશ્વરસહસ્રનામસ્તોત્રમ્

ૐ । અખણ્ડમણ્ડલાકારશ્ચાખિલાણ્ડૈકનાયિકા ।
અમરેન્દ્રાર્ચિતપદશ્ચામરારિનિષૂદિની ॥ ૧॥

અનાદિનિધનોઽનન્તકોટિસૂર્યસમપ્રભા ।
અનન્તોઽનન્તભૂતેશી ચાજિતોઽમિતવિક્રમા ॥ ૨॥

અવિનાશપદસ્થેમા ચાવાઙ્મનસગોચરા ।
અનન્તકોટિકલ્યાણગુણોઽનન્તગુણાશ્રયા ॥ ૩॥

અઘહા ચાઘસંહર્ત્રી ચાવેદ્યોઽદિતિવન્દિતા ।
અપવર્ગપ્રદાતા ચૈવાખિલાભીષ્ટદાયિની ॥ ૪॥

આદિમધ્યાન્તરહિત આદિત્યાયુતભાસુરા ।
આગમાભ્યર્ચિતપદ આમ્નાયાર્થવિલાસિની ॥ ૫॥

આખણ્ડલમુખસ્તુત્ય આત્માનન્દવિધાયિની ।
આશાપાલસમારાધ્ય આધિવ્યાધિવિનાશિની ॥ ૬॥

આપદ્દ્રીન્દ્રદમ્ભોલિરાપન્નાર્તિપ્રભઞ્જના ।
આદિત્યમણ્ડલાન્તઃસ્થ આદિશક્તિસ્વરૂપિણી ॥ ૭॥

આશાવરામ્બરધર આશાન્તૈશ્વર્યદાયિની ।
આનન્દલહરીપૂર્ણ આનન્દોલ્લાસશાલિની ॥ ૮॥

આચાન્તદુરિતસ્તોમ આધારાધેયરૂપિણી ।
આધ્યાત્મિકાધિશમન આગોવૃન્દનિવારિણી ॥ ૯॥

ઇન્દિરાપતિપૂજ્યાઙ્ઘ્રિરિન્દ્રાદિસ્તુતવૈભવા ।
ઇભચર્મામ્બરધર ઇભકુમ્ભનિભસ્તની ॥ ૧૦॥

ઇભવક્ત્રમહાસેનજનકશ્શ્રેષ્ટદાયિની ।
ઇષ્ટિઘ્ન ઇષ્ટિકર્ત્રી ચૈવેયત્તાતીતવિક્રમઃ ॥ ૧૧॥

ઇચ્છાજ્ઞાનક્રિયાશક્તિરિચ્છાકલિતવિગ્રહઃ ।
ઇન્દિરા ભારતી દત્તહસ્તયુગ્મોલ્લસત્કરા ॥ ૧૨॥

ઇન્દ્રયજ્ઞસુખારાધ્ય ઇડાપિઙ્ગલમધ્યગા ।
ઇહામુત્રસુખારાધ્ય ઇન્દુબિમ્બસમાનના ॥ ૧૩॥

ઇનેન્દુવહ્નિનયન ઇન્દુચૂડકુટુમ્બિની ।
ઇન્દ્રિયાદિગુણાતીત ઇન્દ્રાણીસ્તુતિમોદિતા ॥ ૧૪॥

ઈષત્સ્મિતમુખામ્ભોજ ઈશ્વરાર્ધશરીરિણી ।
ઈશ્વરશ્ચેશવનિતા ઈડ્ય ઈશિત્વસિદ્ધિદા ॥ ૧૫॥

ઈશાનાદિબ્રહ્મરૂપ ઈહાધિકફલપ્રદા ।
ઈકારાર્થરહસ્યજ્ઞ ઈકારાર્થસ્વરૂપિણી ॥ ૧૬॥

ઈતિબાધાપ્રશમન ઈશમાયાવિલાસિની ।
ઈડ્યસ્તયેશજીવાતુરીષણાત્યક્તચેતનઃ ॥ ૧૭॥

તથેદૃગિત્યસંવેધા ઈષણોર્જિતદાનવઃ ।
ઈશિત્રી ચેપ્સિતકર ઈશ્વરત્વવિધાયિની ॥ ૧૮॥

ઉક્ષેન્દ્રવાહનારૂઢ ઉત્પત્તિલયવર્જિતા ।
ઉન્નતૈશ્વર્યસમ્પન્ન ઉત્સેધપદદાયિની ॥ ૧૯॥

ઉષાપતિસમારાધ્ય ઉષાકોટિસમર્ચિતા ।
ઉષર્બુધાક્ષિનિર્દગ્ધાનઙ્ગશ્ચોરુપરાક્રમા ॥ ૨૦॥

ઉગ્ર ઉગ્રપ્રતાપા ચૈવોમાપતિરુદારધીઃ ।
ઉદ્યદ્ભાનુપ્રતીકાશ ઉન્નતસ્તનમણ્ડલા ॥ ૨૧॥

ઉગ્રદાનવસંહર્તા ચોત્સવપ્રિયમાનસા ।
ઉષ્ણિક્છન્દઃસ્વરૂપાઢ્યશ્ચોરગાદ્રિનિવાસિની ॥ ૨૨॥

ઉદગ્રશ્રીરુપનિષદુદ્યાનચરકોકિલા ।
ઊર્વશીગીતસન્તુષ્ટ ઉર્ધ્વામ્નાયનિવાસિની ॥ ૨૩॥

ઊર્ધ્વરેતા ઊર્ધ્વગતિરૂનાધિકવિવર્જિતઃ ।
ઊર્ધ્વાણ્ડજન્મધરિણી ઊર્જિતાખિલશત્રુકઃ ॥ ૨૪॥

ઊષ્માગ્નિકણસન્તપ્તદિનેશાગ્નીન્દુભાલકા ।
ઊચિરૂચિષ્મતીચોર્મ્યા ઊરુદેશાન્તમાર્દવા ॥ ૨૫॥

ઊરવ્યોત્તમવેષશ્ચ ઊર્ધ્વયોગાતિગામિની ।
ઊનવાચ્ય ઊનસામ્યા ઊર્ધ્વતાણ્ડવપણ્ડિતઃ ॥ ૨૬॥

ઊર્ધ્વલાસ્યસહાયા ચ ઊરીકૃતસમસ્તદઃ ।
ઊર્જસ્વન્મણિમાલાઢ્યા ઋગ્યજુઃસામગાયનઃ ॥ ૨૭॥

ઋભુક્ષાસ્તુતપાદાબ્જા ઋષિપત્નીસમર્ચિતઃ ।
ઋષિરાજર્ષિસંસેવ્યા ઋષિરૃણવિમોચિની ॥ ૨૮॥

ઋગ્યજુઃસામસારજ્ઞઃ ઋચાં પ્રાચીતિ સન્નુતા ।
રુદ્રાક્ષમાલિકાભૂષો રુદ્રાણીકોટિસેવિતા ॥ ૨૯॥

રુદ્રકોટિજિતામિત્રઃ ઋતુશોણામ્બરાવૃતા ।
ઋતુલક્ષ્મીસહસ્રેશ ઋક્ષરાજસમાનના ॥ ૩૦॥

ઋણત્રયવિમુક્તશ્ચ ઋણપાતકનાશિની ।
ઋગાદિવેદવિનુતઃ ઋગ્વેદાર્યસ્વરૂપિણી ॥ ૩૧॥

ઋતુનાથસખારાતિઃ ઋતુકાલમહોજ્જ્વલા ।
ક્રૂરપાપપરીહારઃ ક્રૂરલોકપરાઙ્મુખી ॥ ૩૨॥

રૂપનિર્જિતકન્દર્પો રૂપલાવણ્યવારિધિઃ ।
રૂપ્યાચલનિવાસશ્ચ રૂપયૌવનશાલિની ॥ ૩૩॥

ભ્રૂણયોગિગણારાધ્યો ભ્રૂણહાર્તિવિનાશિની ।
ભ્રૂભઙ્ગવિલસદ્વક્ત્રા ભ્રૂજિતેન્દ્રશરાસના ॥ ૩૪॥

લુપ્તકન્દર્પગાત્રશ્ચ શ્લિષ્ટકાન્તકલેવરા ।
લુણ્ઠિતારિપુરશ્ચૈવ ક્લૃપ્તવૃત્તિસુરાઙ્ગના ॥ ૩૫॥

લબ્ધભક્તિજનપ્રેયાન્ લબ્ધભોગવિડમ્બિની ।
લુલાયવાહનારાતિઃ લુલાયાસુરમર્દિની ॥ ૩૬॥

લુબ્ધભસ્માઙ્ગરાગાઢ્યઃ ક્લૃપ્તાકલ્પસમુજ્જ્વલા ।
લૂનબ્રહ્મશિરાલીઢમદિરામોદવિહ્વલા ॥ ૩૭॥

ક્લીબ્યઃ ક્લીઙ્કારનિલયા શ્લાઘ્યઃ શ્લાઘ્યગુણાશ્રયા ।
મ્લાનેતરમુખામ્ભોજો બ્લૂમ્બીજાર્થસ્વરૂપિણી ॥ ૩૮॥

એણારચૂડ એકાક્ષર્યૈક એકાન્તવાસિની ।

એષણારહિતશ્ચૈણલોચના ચૈધિતોત્સવઃ ॥ ૩૯॥

એકાન્તપૂજનપ્રીતા એકાન્તધ્યાનતત્પરઃ ।
એકભોગા એકસૌખ્યઃ એકૈશ્વર્યપ્રદાયિની ॥ ૪૦॥

એકભક્ત એકગુણા એકાન્તાધ્વરદીક્ષિતઃ ।
એકવીરપ્રભાપૂરનિમજ્જત્પ્રિયમાનસા ॥ ૪૧॥

એનઃકાન્તારદાવાગ્નિરેકપ્રાભવશાલિની ।
એકસિદ્ધ એકક્લૃપ્તિઃ એકસૃષ્ટિસ્તથૈધિતા ॥ ૪૨॥

એલાકર્પૂરતામ્બૂલપ્રીત એકાન્તપૂજિતા ।
એકવિદ્ય એકકાન્તા એકભક્તિમદર્ચિતઃ ॥ ૪૩॥

ઐઙ્કારબીજમાત્રાઢ્યા ઐરાવતપતિસ્તુતઃ ।
ઐરાવતસમારૂઢા ઐન્દ્રલોકસમાશ્રયઃ ॥ ૪૪॥

ઐઙ્કારશુક્તિકામુક્તામણિરૈરાવણાર્ચિતઃ ।
ઐઙ્કારાદર્શબિમ્બશ્રીરૈઙ્કારપ્રતિભૂમિકઃ ॥ ૪૫॥

ઐઙ્કારમન્ત્રસર્વસ્વં ઐશ્વર્યાધિકશોભનઃ ।
ઐન્દ્રલોકવિધાત્રી ચ ઐશ્વર્યાષ્ટકદાયકઃ ॥ ૪૬॥

ઐં ઐમ્પદજપપ્રીત ઐઙ્કારમનુજાપિકા ।
ઓઙ્કારરૂપ ઓઙ્કારનિલયા ઓમ્પદાભિધઃ ॥ ૪૭॥

ઓજોવતી તથૌજસ્વી ઓતપ્રોતવિવર્જિતા ।
ઓષધીશાર્ધચૂડશ્ચ ઓષધીફલદાયિની ॥ ૪૮॥

ઓડ્ડામરેશ્વરારાધ્ય ઓડ્યાણાભરણોજ્જ્વલા ।
ૐ તદ્બ્રહ્મપદસ્થોમા ઓડ્યાણપીઠવાસિની ॥ ૪૯॥

ઓમિત્યેકાક્ષરપદ ઓષધીશસમાનના ।
ઓઘીકૃતમહાતેજા ઓઘત્રયવિલાસિની ॥ ૫૦॥

ઓઙ્કારમૂલિકાકન્દ ઓકારા વાલવલ્લરી ।
ઓઙ્કારગિરિહર્યૃક્ષ ઓન્નમસ્કારવાચ્યકા ॥ ૫૧॥

ઓમાપોજ્યોતિરાદિત્ય ઓડ્ડીશાનન્દરૂપિણી ।
ઔપમ્યરહિત ઔદાર્યશાલિન્યૌપદ્રવાપહઃ ॥ ૫૨॥

ઔડ્વાર્યૌર્વાનલરુચિરૌન્નત્યપદદાયિની ।
ઔપાસનપરશ્ચૌપનિષદર્થસ્વરૂપિણી ॥ ૫૩॥

અમ્બિકાપતિરમ્બાચ અન્તર્યામ્યન્તરાત્મિકા ।
અણ્ડકોટિસહસ્રેશશ્ચાણ્ડાદ્વાહ્યનિકેતના ॥ ૫૪॥

અન્ધકાસુરસંહારી ચાન્તસ્તિમિરભેદિની ।
અન્તકારિરનન્તશ્રીરનન્તોઽનન્તપૂજિતા ॥ ૫૫॥

અઞ્જનાતનયારાધ્યશ્ચાઞ્જનાર્થવિધાયિની ।
અઙ્ગીકૃતમહાક્ષ્વેલશ્ચાઙ્કારોપિતષણ્મુખા ॥ ૫૬॥

અંશુમાનંશુમત્સેવ્યા ચાન્તકારારાતિરઙ્ગના ।
અષ્ટવિધેશ્વરારાધ્યશ્ચાષ્ટસિદ્ધિવિધાયિની ॥ ૫૭॥

અષ્ટમૂર્તિરષ્ટલક્ષ્મીસેવિતાઙ્ઘ્રિસરોરુહા ।
અષ્ટાવિંશાગમસ્તુત્યશ્ચાષ્ટત્રિંશત્કલાત્મિકા ॥ ૫૮॥

અષ્ટદિક્પાલસેવ્યાઙ્ઘ્રિરષ્ટાષ્ટકકલાત્મિકા ।
અષ્ટાદશપુરાણજ્ઞશ્ચાષ્ટાદશપુરીશ્વરી ॥ ૫૯॥

અષ્ટદિગ્ગજસંવીતશ્ચાષ્ટવર્ણવિલાસિની ।
અષ્ટાપદાદ્રિકોદણ્ડશ્ચાષ્ટૈશ્વર્યપ્રદાયિની ॥ ૬૦॥

અષ્ટભૈરવસંવીતશ્ચાષ્ટદ્વયવયોજ્જ્વલા ।
અષ્ટાક્ષરીજપપરશ્ચાષ્ટવાગ્દેવતાવૃતા ॥ ૬૧॥

અર્ધાદિશિખરાવાસશ્ચાર્ધનારીશ્વરપ્રિયા ।
અષ્ટાઙ્ગયોગનિરતશ્ચાષ્ટશક્તિપરીવૃતા ॥ ૬૨॥

અષ્ટાપદમહાપીઠ અષ્ટાપદગિરિસ્થિતા ।
આશ્ચર્યશીલ આશ્ચર્યનિલયાઽઽશ્ચર્ય એવ ચ ॥ ૬૩॥

આશ્ચર્યજનિરાશ્ચર્યનિષ્ઠ આશ્ચર્યદાયિની ।
આર્તિઘ્ન આર્તિસંહર્ત્રી આકસ્મિકમહોજ્જ્વલઃ ॥ ૬૪॥

કલ્યાણીકલિતાકલ્પઃ કલ્યાણાચલવાસિની ।
કમનીયગુણાવાસઃ કમલાક્ષસહોદરી ॥ ૬૫॥

કઞ્જભૂજનકઃ કઞ્જનેત્રી કર્મફલપ્રદઃ ।
કર્મકર્ત્રીકાલકાલઃ કન્દર્પાવહદર્શના ॥ ૬૬॥

કન્દર્પકોટિલાવણ્યઃ કમલાક્ષી કપાલભૃત્ ।
કાત્યાયની કાલકાલઃ કાવ્યાલાપવિનોદિની ॥ ૬૭॥

કાટ્યઃ કપર્દિસુખદા કૈલાસશિખરાલયઃ ।
કામેશ્વરાલિઙ્ગિતાઙ્ગી કામદઃ કલિનાશિની ॥ ૬૮॥

કર્મી કામકલા ચૈવ કામકેલિવિનોદનઃ ।
કદમ્બવાટીમધ્યસ્થા કદમ્બવનનાયકઃ ॥ ૬૯॥

ખટ્વાઙ્ગાદિપ્રહરણા ખડ્ગખેટકધારકઃ ।
ખગવાહદ્વયાદૃશ્યા ખગરાજપરાક્રમઃ ॥ ૭૦॥

ખગાનેકપ્રભા ખેલાક્લૃપ્તબ્રહ્માણ્ડમણ્ડલઃ ।
ખેદઘ્નખેચરીયોગદાયિની ખેચરેશ્વરઃ ॥ ૭૧॥

ખઞ્જરીટસમચ્છાયા ખલલોકપરાઙ્મુખઃ ।
ખશ્યામા ખગતિસ્તુત્યઃ ખાતપાતવિનાશિની ॥ ૭૨॥

ખમૂર્ધજઃ ખગગતિઃ ખગઃ ખગવિધાયિની ।
ખડ્ગરાવણપૂજ્યાઙ્ઘ્રિઃ ખગચારુપયોધરા ॥ ૭૩॥

ખણ્ડિતાશેષપાષણ્ડઃ ખિન્નાભીષ્ટપ્રદાયિની ।
ગઙ્ગાધરો ગિરિસુતા ગજાસ્યાસુરસૂદનઃ ॥ ૭૪॥

ગમ્ભીરા ગગનાકારો ગજકુમ્ભનિભસ્તની ।
ગજચર્મપરીધાનો ગન્ધર્વકુલસેવિતા ॥ ૭૫॥

ગિરીન્દ્રચાપો ગીર્વાણસન્નુતા ગાનલોલુપઃ ।
ગુહેભવક્ત્રજનની ગુહ્યકેશસખો ગુરુઃ ॥ ૭૬॥

ગુહ્યકારાધ્યચરણો ગણનાથા ગભીરધીઃ ।
ગણ્યા ગુરુર્ગુણાતીતા ગુણજ્ઞો ગુણમાતૃકા ॥ ૭૭॥

ગોવિન્દો ગોપિકારાધ્યા ગોપતિર્ગોમતી તથા ।
ગન્ધર્વરૂપો ગન્ધર્વકન્યાકોટિસમર્ચિતા ॥ ૭૮॥

ઘનો ઘનાગમશ્યામા ઘનપ્રૌઢો ઘનસ્તની ।
ઘૃણી ઘૃણાનિધિર્ઘ્રાણો ઘૃતાચીપૂજ્યપાદુકઃ ॥ ૭૯॥

ઘણ્ટામુખસુસંપ્રીતો ઘણ્ટારવવિનોદિની ।

ઘનીભૂતપ્રભાપૂરો ઘળઙ્ઘલિતમેખલા ॥ ૮૦॥

ઘનસારવિલિપ્તાઙ્ગો ઘનસારસવર્ણિની ।
ઘૂર્ણમાનજગત્પ્રાણો ચૂર્ણિતારક્તલોચના ॥ ૮૧॥

ઘટોદ્ભવમુનિસ્તુત્યો ઘટોદ્ભવકૃતાનતિઃ ।
ઘટોદ્ભવકૃતસ્નેહો ઘટાકારકુચદ્વયા ॥ ૮૨॥

ઘોરદંષ્ટ્રાકરાલાસ્યો ઘોરઘોરસ્વરૂપિણી ।
ઘોષપાલસહસ્રેશો ઘોષાન્તઃપુરચારિણી ॥ ૮૩॥

ઘોષિતાગમસર્વસ્વો ઘોષિતામ્નાયવેદિતા ।
ઘોરપાપાટવીદાવો ઘોરપાતકનાશિની ॥ ૮૪॥

ધર્માદિત્યપ્રતીકાશો ધર્મસન્તાપચન્દ્રિકા ।
ધર્માગ્નિહોત્રસુપ્રીતો ધર્માહુતિફલપ્રદા ॥ ૮૫॥

ચતુરશ્રગૃહાવાસશ્ચતુરઙ્ગબલેશ્વરી ।
ચતુશ્ચક્રસમારાધ્યશ્ચતુર્વર્ગફલપ્રદા ॥ ૮૬॥

ચાતુર્યશાલી ચતુરા ચતુરાનનદેશિકઃ ।
ચતુષ્ષષ્ટિમહાદૂતી યોગિનીગણસેવિતા ॥ ૮૭॥

ચન્દ્રચૂડશ્ચન્દ્રમુખી ચન્દ્રાદિત્યાગ્નિલોચનઃ ।
ચામીકરાચલાવાસા ચામીકરમહાસનઃ ॥ ૮૮॥

ચારુચામરહસ્તશ્રી શારદાપરિવીજિતા ।
ચન્દ્રિકાધવલાકારશ્ચક્રવાકનિભસ્તની ॥ ૮૯॥

ચાપીકૃતમહામેરુશ્ચાપબાણલસત્કરા ।
ચક્રવાલાદ્રિનિલયશ્ચક્રવાકપ્રિયઙ્કરી ॥ ૯૦॥

ચક્રદાનરતશ્ચૈવ ચક્રરાજનિકેતના ।
ચારુહાસમુખશ્ચૈવ ચારુચન્દ્રકલાધરા ॥ ૯૧॥

ચિચ્છક્તિશ્ચિદ્ઘનશ્ચૈવ ચિન્તાશોકવિવર્જિતા ।
ચિત્રામ્બરશ્ચિત્રવેષા ચિત્રકૃત્યશ્ચિદાકૃતિઃ ॥ ૯૨॥

ચર્મામ્બરશ્ચક્રહસ્તા ચક્રપાણિર્વરપ્રદઃ ।
ચૈતન્યકુસુમપ્રીતા ચૈતન્યશ્ચારુવાદિની ॥ ૯૩॥

ચમૂરુપાણિશ્ચામ્પેયનાસિકા ચમ્પકપ્રિયઃ ।
ચઞ્ચલાક્ષી ચઞ્ચલાત્મા ચઞ્ચરીકકુલાલકા ॥ ૯૪॥

ચતુરાસ્યશિરશ્છેત્તા ચણ્ડાસુરનિષૂદિની ।
ચણ્ડેશ્વરશ્ચણ્ડિકાચ ચિત્રકૃત્યવિશારદઃ ॥ ૯૫॥

ચિત્રરૂપા ચિત્તજારિઃ ચિતિશ્ચિન્તિતદાયકઃ ।
છન્દોગ્યા છન્દસાઽઽરાધ્યઃ છન્દોરાશિશ્છવિચ્છદઃ ॥ ૯૬॥

છન્દોગા છાન્દસાઽઽરાધ્યઃ છત્રિણી છવિપઞ્જરઃ ।
છાયાપતિસમારાધ્યા છન્દશ્છાયાનુસારિણી ॥ ૯૭॥

છન્દોઽભ્યાસૈકનિરતશ્છન્દોગસ્તુતિમોદિની ।
છિન્નારિવર્ગસઙ્ઘાતશ્છન્નપાતકનાશિની ॥ ૯૮॥

છન્નદૈત્યકુલચ્છેત્તા છાયામણ્ડલલક્ષિતા ।
છાયાતપત્રસંવીતશ્છન્નવીરપરિષ્કૃતા ॥ ૯૯॥

જનની જનકો જૈત્રી જિત્વરો જિતમત્સરા ।
જગદુજ્જીવનકરો જરાધ્યાન્તરવિપ્રભા ॥ ૧૦૦॥

જગત્પ્રાણો જગત્કર્ત્રી જગદાહ્લાદદાયકઃ ।
જનવિશ્રાન્તિદાત્રી ચ જિતકામો જયાર્ચિતા ॥ ૧૦૧॥

જમદગ્નિસમારાધ્યો જમદગ્નિવરપ્રદા ।
જઙ્ગમાજઙ્ગમોત્સન્નો જઙ્ગમસ્થાવરાત્મિકા ॥ ૧૦૨॥

જિતામિત્રો જિતક્રોધા જાતિવર્ણવિવર્જિતઃ ।
જાતીચમ્પકપુન્નાગવિલસન્નીલકુન્તલા ॥ ૧૦૩॥

સાક્ષી જાગ્રદવસ્થાયાઃ જગદ્રક્ષણજાગ્રતી ।
જમ્ભારિપ્રમુખારાધ્યો જમ્ભારિમણિમણ્ડિતા ॥ ૧૦૪॥

જાતરૂપાચલધનુઃ જગત્પ્રલયસાક્ષિણી ।
ઝષાદિરૂપદશકસેવિતાઙ્ઘ્રિસરોરુહઃ ॥ ૧૦૫॥

ઝષાક્ષી ઝષકેત્વઙ્ગદાહકો ઝમ્પદાભિધા ।
ઝર્ઝરારાવરસિકો ઝલ્લરીવાદ્યકોવિદા ॥ ૧૦૬॥

ઝટિત્યભીષ્ટદાતા ચ ઝલજ્ઝલિતમેખલા ।
ઝષકેત્વઙ્ગજનકો ઝરીકૃતસુભાષણા ॥ ૧૦૭॥

જ્ઞાનજ્ઞપ્તિર્જ્ઞાનરૂપો જ્ઞાનજ્ઞેયવિલાસિની ।
જ્ઞાનવેદ્યો જ્ઞાનગમ્યા જ્ઞાનદો જ્ઞાનસિદ્ધિદા ॥ ૧૦૮॥

જ્ઞાનાધારો જ્ઞાનમુદ્રા જ્ઞાનયજ્ઞપરાયણઃ ।
જ્ઞાનદૃષ્ટિપ્રતીતા ચ જ્ઞાનદૃષ્ટિપ્રકાશકઃ ॥ ૧૦૯॥

જ્ઞાનનિષ્ઠા જ્ઞાનનિધિઃ જ્ઞાતવ્યાર્થપ્રકાશિની ।
જ્ઞાતિહીનો જ્ઞાનયજ્ઞદીક્ષિતા જ્ઞાનવૃદ્ધિદઃ ॥ ૧૧૦॥

જ્ઞાનનિષ્ઠજનપ્રીતા જ્ઞાનશાસ્ત્રપ્રવર્તકઃ ।
જ્ઞાનામ્બુનિધિપૂર્ણેન્દુઃ જ્ઞાનામૃતમહોદધિઃ ॥ ૧૧૧॥

જ્ઞાનજ્ઞેયજ્ઞાતૃરૂપત્રિપુટીવીક્ષણાતિગા ।
ટઙ્કાદ્યાયુધસમ્પન્નઃ ટઙ્કારાક્ષરરૂપિણી ॥ ૧૧૨॥

ટઙ્કારાકારચન્દ્રશ્રીઃ ટઙ્કારામૃતવર્ષિણી ।
ડાકિનીશક્તિસંયુક્તો ડાકિન્યાદિપરીવૃતા ॥ ૧૧૩।
ડિણ્ડિમધ્વનિસુપ્રીતો ડાડિમીકુસુમપ્રભા ।
ઢક્કાવાદ્યવિશેષજ્ઞઃ ઢકારાક્ષરરૂપિણી ॥ ૧૧૪॥

તામ્રસ્તામ્રાધરા તત્ત્વં તટિદ્ગૌરી તમોનુદઃ ।
તરુણાર્કપ્રતીકાશા તરુણેન્દુશિખામણિઃ ॥ ૧૧૫॥

તાપત્રયાગ્નિશમના તારકસ્તામ્રલોચના ।
તરુણસ્તરુણી ચૈવ તપોમૂર્તિસ્ત્રયીમયી ॥ ૧૧૬॥

તાપસાન્તરસઞ્ચારી તાપસીવેષધારિણી ।
તારસ્વરૂપસ્તારેશવદના તાણ્ડવપ્રિયઃ ॥ ૧૧૭॥

તન્વી તામ્રજટાજૂટસ્તમાલશ્યામલાકૃતિઃ ।
ત્ર્યમ્બકશ્ચ ત્રિકોણેશી ત્રિમૂર્તિસ્ત્રિપુરામ્બિકા ॥ ૧૧૮॥

ત્રિકૂટજ્ઞસ્ત્રિકૂટેશી ત્રિવિષ્ટપપદપ્રદઃ ।
ત્ર્યક્ષરી ત્રિગુણાતીતસ્ત્રિદશશ્રીસમાવૃતા ॥ ૧૧૯॥

ત્રિકાલજ્ઞસ્ત્રિલોકેશી ત્રેતાગ્નિસ્ત્રિપદાત્મિકા ।
દેવેશો દક્ષિણામૂર્તિર્દક્ષયજ્ઞવિનાશિની ॥ ૧૨૦॥

દેવદાનવસેવ્યાઙ્ઘ્રિર્દરસ્મેરમુખામ્બુજા ।

દર્વીકરેન્દ્રભૂષાઢ્યો દરાન્દોલિતલોચના ॥ ૧૨૧॥

દિગમ્બરો દયામૂર્તિર્દેશિકો દીનવત્સલા ।
દેશકાલપરિજ્ઞાતા દેશોપદ્રવનાશિની ॥ ૧૨૨॥

દીક્ષિતો દણ્ડનીતિસ્થા દેવર્ષિગણસેવિતઃ ।
દહરાકાશનિલયા દુષ્ટદૂરો દુરાસદા ॥ ૧૨૩॥

દુઃખદારિદ્ર્યશમનો દુરાચારપરાઙ્મુખી ।
દિનારમ્ભાર્કકોટિશ્રીઃ દિવ્યજ્ઞાનસુધાનિધિઃ ॥ ૧૨૪॥

ધનેશ્વરસખો ધન્યા ધનુષ્માન્ધનશેવધિઃ ।
ધર્માધારો ધર્મપરા ધર્મો ધર્મકૃદાશ્રયા ॥ ૧૨૫॥

ધીરો ધૈર્યગુણોપેતો ધીરોદાત્તગુણોત્તરઃ ।
ધીમતી ધૈર્યનિલયો ધરાધરસુતા ધની ॥ ૧૨૬॥

ધર્મેતરાટવીદાવપાવકા ધર્મવિગ્રહઃ ।
ધૈર્યદાત્રી ધૈર્યશીલો ધૌરેયજનવત્સલા ॥ ૧૨૭॥

નાગાચલેન્દ્રનિલયો નાગકન્યાસમર્ચિતા ।
નાગેન્દ્રકુણ્ડલધરો નાગરાજસુપૂજિતા ॥ ૧૨૮॥

નાગચર્મપરીધાનો નાગાનનગુહપ્રસૂઃ ।
નાગેન્દ્રહારવલયો નાગમાણિક્યમણ્ડિતા ॥ ૧૨૯॥

નાગેશાદ્યમરસ્તુત્યો નાગસ્ત્રીકોટિસન્નુતા ।
નાગારિવાહજનકો નાગકુમ્ભનિભસ્તની ॥ ૧૩૦॥

નાગેન્દ્રશિખરોત્તંસો નાગેન્દ્રપ્રિયનન્દિની ।
નારાયણપ્રિયસખો નારસિંહવપુર્ધરા ॥ ૧૩૧॥

નારદાદિમુનિસ્તુત્યો નામપારાયણપ્રિયા ।
નિર્જરારિગણધ્વંસી નિત્યયૌવનશાલિની ॥ ૧૩૨॥

પઞ્ચબ્રહ્મમયઃ પઞ્ચબ્રહ્મમઞ્ચાધિશાયિની ।
પઞ્ચયજ્ઞપરપ્રીતઃ પઞ્ચકૃત્યપરાયણા ॥ ૧૩૩॥

પઞ્ચાક્ષરમનુપ્રીતઃ શ્રીમત્પઞ્ચદશાક્ષરી ।
પઞ્ચભૂતનિવાસશ્ચ પઞ્ચપાતકનાશિની ॥ ૧૩૪॥

પઞ્ચેન્દ્રિયવિલાસશ્ચ પઞ્ચબાધાનિવારિણી ।
પઞ્ચપઞ્ચાવતારશ્ચ પઞ્ચાશદ્વર્ણરૂપિણી ॥ ૧૩૫॥

પઞ્ચવક્ત્રઃ પાર્વતી ચ પઞ્ચવજ્રાસનસ્થિતઃ ।
પ્રપઞ્ચકોટિજનની પ્રપઞ્ચોત્પત્તિવર્જિતઃ ॥ ૧૩૬॥

પઞ્ચાશત્પીઠનિલયા પરબ્રહ્મ પરાત્પરા ।
પઞ્ચયજ્ઞપરાવાસઃ પઞ્ચસઙ્ખ્યોપચારિણી ॥ ૧૩૭॥

ભાલનેત્રઃ ફલાધારા ફલવાન્ફલરૂપિણી ।
ફુલ્લારવિન્દનયનઃ ફુલ્લેન્દીવરલોચના ॥ ૧૩૮॥

ભાલમધ્યલસન્નેત્રદહનાલીઢમન્મથઃ ।
ભાલચન્દ્રકલઙ્કશ્રીકસ્તૂરીતિલકોજ્જ્વલા ॥ ૧૩૯॥

સ્ફટિકાદ્રિસવર્ણાભઃ સ્ફટિકાક્ષલસત્કરા ।
સ્ફારકીર્તિઃ સ્ફુરત્કાન્તિઃ સ્ફુટગઙ્ગાજટાધરઃ ॥ ૧૪૦॥

સ્ફુરન્મઙ્ગલસૂત્રાઢ્યા સ્ફુરત્તાટઙ્ગમણ્ડિતઃ ।
સ્ફુટાટ્ટહાસવદનતોષિતેશમનોરથા ॥ ૧૪૧॥

ફાલ્ગુનાસ્ત્રોદ્ભિન્નશિરાઃ ફાલ્ગુનાસ્ત્રપ્રદાયિની ।
બલભદ્રાર્ચિતો બાલા બલવાન્ બલતોષિતા ॥ ૧૪૨॥

બલીવર્દસમારૂઢો બાલાર્કકિરણારુણા ।
બડવાગ્નિપ્રતીકાશો બાહુલેયપ્રિયઙ્કરી ॥ ૧૪૩॥

બિલ્વકાન્તારમધ્યસ્થો બિસતન્તુસમાકૃતિઃ ।
બાણાસુરાર્ચનપ્રીતો બાણચાપલસત્કરા ॥ ૧૪૪॥

બિન્દુમણ્ડલમધ્યસ્થો બિન્દુનાદસ્વરૂપિણી ।
બહુરૂપશ્ચ બિમ્બોષ્ઠી બુદ્ધિજ્ઞેયો બુધાર્ચિતા ॥ ૧૪૫॥

બુધ્યો બુદ્ધિપ્રદા બુદ્ધિધનદો બિન્દુમાલિની ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગો ભક્તાનુગ્રહતત્પરા ॥ ૧૪૬॥

ભવો ભવાની ભર્ગશ્ચ ભવઘ્ની ભવનાશનઃ ।
ભદ્રમૂર્તિર્ભાગ્યનિધિર્ભક્તાભીષ્ટપ્રદાયિની ॥ ૧૪૭॥

ભિષગ્ભેષજરૂપા ચ ભક્તહાર્દતમોનુદઃ ।
ભૂતિદાત્રી ભૂતિભૂષો ભૂતધાત્રી ભવોદ્ભવઃ ॥ ૧૪૮॥

ભુવનેશી ભોગિભૂષો ભદ્રકાલી ભગાક્ષિભિત્ ।
મહાદેવી મહારાજ્ઞી મહાન્મઙ્ગલરૂપિણી ॥ ૧૪૯॥

મહામૃત્યુપ્રશમનો મહાતાણ્ડવસાક્ષિણી ।
મન્ત્રવેદ્યો મન્ત્રમયી મિત્રેશો મિત્રરૂપિણી ॥ ૧૫૦॥

મન્દસ્મિતમુખામ્ભોજો મદિરામોદવિહ્વલા ।
મત્તેભચર્મવસનો મત્તમાતઙ્ગગામિની ॥ ૧૫૧॥

મીઢુષ્ટમશ્ચ મીનાક્ષી મુદિતો મુક્તિદાયિની ।
મૂલમન્ત્રસ્વરૂપજ્ઞો મૂર્તિન્યાસાધિદેવતા ॥ ૧૫૨॥

મૃગપાણિર્મૃગમદાલિપ્તાઙ્ગી મૃત્યુભઞ્જનઃ ।
મેનકાનન્દિનીમેધ્યો મેઘશ્યામલકુન્તલા ॥ ૧૫૩॥

યક્ષરાજપ્રિયસખો યક્ષસ્ત્રીકોટિસેવિતા ।
યજ્ઞપ્રિયો યજ્ઞભોક્ત્રી યજ્વા યાજ્યશ્ચ યાજકઃ ॥ ૧૫૪॥

યમાદિનિયમપ્રીતા યામ્યો યમભયાપહા ।
યોગી યોગપ્રદા યોગ્યો યોગિવૃન્દસમર્ચિતા ॥ ૧૫૫॥

યમારાતિર્યાયજૂકવત્સલા યુગનાયકઃ ।
યશસ્વિની યજુર્વેદસ્તુત્યો યોષામણિસ્તથા ॥ ૧૫૬॥

યક્ષરાક્ષસવેતાલભયઘ્નો યક્ષિણીશ્વરી ।
રક્તાદ્રિશિખરાવાસો રક્તાક્ષી રમ્યભૂષણઃ ॥ ૧૫૭॥

રમણીયગુણસ્તોમા રાકાચન્દ્રનિભાનનઃ ।
રાજીવદલનેત્રી ચ રૂપવાન્ રોગવર્જિતા ॥ ૧૫૮॥

રૂપયૌવનસમ્પન્નો રૂઢયૌવનશાલિની ।
રેવતીપતિપૂજ્યાઙ્ઘ્રિઃ રેણુકાસ્તુતિમોદિની ॥ ૧૫૯॥

રોમહર્ષણસર્વાઙ્ગો રોગારણ્યકુઠારિકા ।
રૂપ્યાચલેન્દ્રનિલયો રણન્મઞ્જીરનૂપુરા ॥ ૧૬૦॥

રમ્ભાનાટ્યપ્રિયશ્ચૈવ રમ્ભાસ્તમ્ભોરુશાલિની ।
રસપ્રિયો રસાવાસા રસિકો રસરૂપિણી ॥ ૧૬૧॥

લલાટાક્ષો લલામશ્રી વિડમ્બિમુકુરપ્રભા ।

લાસ્યપ્રિયો લાસ્યકર્ત્રી લાભાલાભવિવર્જિતઃ ॥ ૧૬૨॥

લકુલી લિઙ્ગરૂપશ્ચ લાવણ્યામૃતવારિધિઃ ।
લબ્ધભાગ્યો લબ્ધપતિર્લબ્ધસૌખ્યો લસત્તનુઃ ॥ ૧૬૩॥

લોકાલોકાચલાવાસો લોકપાલસમર્ચિતા ।
લક્ષ્મીનારાયણસ્તુત્યો લીલાશુકકરોજ્જ્વલા ॥ ૧૬૪॥

લોકરક્ષકનિરતો લાકિન્યાદિપરીવૃતા ।
લઙ્કાપતિસમારાધ્યપાદુકો લલિતામ્બિકા ॥ ૧૬૫॥

વામદેવો વિશાલાક્ષી વિષકણ્ઠો વિરાણમયી(ણિઃ)।
વિરૂપાક્ષો વિદ્રુમાભા વિદ્યુલ્લેશો વિયત્પ્રસૂઃ ॥ ૧૬૬॥

વેદાગમપુરાણજ્ઞો વેદાન્તાર્થસ્વરૂપિણી ।
વાઞ્છિતાખિલદાતા ચ વાઞ્છિતાર્થપ્રદાયિની ॥ ૧૬૭॥

વીરભદ્રો વીરમાતા વિશ્વામિત્રપ્રિયઙ્કરઃ ।
વીરગોષ્ઠીપ્રિયા વીરો વિષ્ણુમાયાવિલાસિની ॥ ૧૬૮॥

વિશ્વમ્ભરો વિશ્વકર્ત્રી વીર્યવાન્ વિશ્વસાક્ષિણી ।
વૌષડન્તપદસ્તુત્યો વૌષડન્તસમુત્સુકા ॥ ૧૬૯॥

શઙ્કરઃ શામ્ભવી શમ્ભુઃ શઙ્કરાર્ધશરીરિણી ।
શિતિકણ્ઠઃ શિવારાધ્યા શિવઃ શિવકુટુમ્બિની ॥ ૧૭૦॥

શિષ્ટેષ્ટદઃ શિષ્ટગતિઃ શુદ્ધવર્ણઃ શુચિસ્મિતા ।
શેષાદ્રિશિખરાવાસઃ શેષકન્યાસમર્ચિતા ॥ ૧૭૧॥

શ્રીમાન્ શૃઙ્ગારલહરી શૃઙ્ગારાર્ધકલેવરઃ ।
શ્રીપ્રદા શિપિવિષ્ટશ્ચ શ્રીકણ્ઠા શ્રિતવત્સલઃ ॥ ૧૭૨॥

શ્રિતત્રાત્રી શિવપરઃ શિષ્ટઃ શિવપતિવ્રતા ।
ષડક્ષરન્યાસરૂપઃ ષટ્કોણપુરવાસિની ॥ ૧૭૩॥

ષટ્ષષ્ટિકોટિતીર્થજ્ઞઃ ષટ્ત્રિંશત્તત્ત્વરૂપિણી ।
ષોઢાન્યાસપરપ્રીતઃ ષોડશાક્ષરરૂપિણી ॥ ૧૭૪॥

ષડ્-દર્શનસમાસીનઃ ષડ્વર્ગારિવિનાશિની ।
ષટ્કાલપૂજનપ્રીતઃ ષડામ્નાયાધિદેવતા ॥ ૧૭૫॥

ષડ્વક્ત્રજનકશ્ચૈવ ષટ્ચક્રપુરનાયિકા ।
ષડ્ગવેષધરઃ ષડ્ગવેષલોકપરાઙ્મુખી ॥ ૧૭૬॥

ષાડ્ગુણ્યપરિપૂર્ણશ્ચ ષડ્ગુણાતીતવિગ્રહા ।
ષડમ્બુરુહચક્રશ્રીઃ ષષ્ઠીશમયરૂપિણી ॥ ૧૭૭॥

સદાશિવઃ સદારાધ્યા સર્વજ્ઞઃ સર્વસાક્ષિણી ।
સકલાગમસંસ્તુત્યઃ સર્વલોકવશઙ્કરી ॥ ૧૭૮॥

સર્વેશ્વરશ્ચ સાવિત્રી સંવિત્સંવિદ્વિલાસિની ।
સદાચારપરપ્રીતઃ સૌમઙ્ગલ્યવિવર્ધિની ॥ ૧૭૯॥

સર્વસૌભાગ્યજનકઃ સાધ્વી સાધુજનપ્રિયઃ ।
સૌન્દર્યલહરી ચૈવ સૌરમન્ત્રપ્રકાશનઃ ॥ ૧૮૨॥

સૌરદર્શનસેવ્યાઙ્ઘ્રિઃ સૌખ્યદઃ સૌખ્યશાલિની ।
સૌહાર્દનિલયશ્ચૈવ સૌહિત્યપ્રિયમાનસઃ ॥ ૧૮૩॥

સર્વપાતકસંહારી સર્વધર્મપ્રવર્ધિની ।
સોમઃ સૌમ્યગુણા સત્યઃ સત્યજ્ઞાનપરાયણા ॥ ૧૮૪॥

હાલાહલાઙ્કિતગ્રીવો હેલાલાલિતમન્મથા ।
હેરમ્બતાતો હેમાદ્રિનિલયા હિમશૈલગઃ ॥ ૧૮૫॥

હયમેધસમારાધ્યા હયગ્રીવમુખસ્તુતઃ ।
હત્યાદિદુરિતાઘઘ્ની હરો હરિસહોદરી ॥ ૧૮૬॥

હિરણ્યગર્ભજનકો હિરણ્યમણિકુણ્ડલા ।
હિરણ્યરેતા હેમાઙ્ગી તથા હેમસભાપતિઃ ॥ ૧૮૭॥

હેમકુમ્ભસ્તનનતા હંસનામપદસ્તુતઃ ।
હંસકાલપદસ્તુત્યા હકારો હંસિકાગતિઃ ॥ ૧૮૮॥

હસ્તિચર્મામ્બરધરો હસ્તિગા હતશાત્રવઃ ।
હર્યૃક્ષવાહના હંસો હંસમન્ત્રપ્રકાશિની ॥ ૧૮૯॥

પ્રળયાર્કપ્રભાપૂરઃ પ્રળયાગ્નિસમપ્રભા ।
પ્રળયામ્બુધિનિર્ઘોષઃ પ્રળયાનિલવેગિની ॥ ૧૯૦॥

વ્યાળેન્દુકુણ્ડલધરો વ્યાળારિધ્વજસોદરી ।
કાળકણ્ઠઃ કળાલાપઃ કલાપતિશિખમણિઃ ॥ ૧૯૧॥

કાળી કાળિન્દિસંસેવ્યઃ કાળરાત્રિતપસ્વિની ।
કલાનિધિઃ કાળકણ્ઠી પઞ્ચમારાવવાઙ્મયી ॥ ૧૯૨॥

કળઙ્કરહિતઃ કાળમેઘશ્યામલકુન્તલા ।
ક્ષમાધરેન્દ્રજામાતા ક્ષમાભૃદ્વરનન્દિની ॥ ૧૯૩॥

ક્ષપાનાથાર્ધમકુટઃ ક્ષપાનાથસમાનના ।
ક્ષમાનિધિઃ ક્ષમાપૂજ્યા ક્ષમાકાન્તઃ ક્ષમાવતી ॥ ૧૯૪॥

ક્ષામક્ષામઃ ક્ષામમધ્યા ક્ષિપ્રજિત્ ક્ષિપ્રસિદ્ધિદા ।
ક્ષુદ્રેતરપ્રસન્નાત્મા ક્ષુદ્રશૂન્યવિનાશિની ॥ ૧૯૫॥

ક્ષેત્રેશ્વરઃ ક્ષેત્રકરી ક્ષેત્રવૃદ્ધઃ ક્ષયાપહા ।
ક્ષેમઙ્કરઃ ક્ષણપ્રીતા ક્ષણદાચરભઞ્જનઃ ॥ ૧૯૬॥

ક્ષયવૃદ્ધિવિહીના ચ ક્ષેત્રજ્ઞઃ ક્ષેત્રવાસિની ।
ક્ષયાપસ્મારશમનઃ ક્ષેત્રપાલસુપૂજિતા ॥ ૧૯૭॥

ક્ષણપૂજાપ્રસન્નાત્મા ક્ષૌમામ્બરપરિષ્કૃતા ।
ક્ષુદ્રરોગાપહારી ચ ક્ષુદ્રકૃત્યપરાઙ્મુખા ॥ ૧૯૮॥

ક્ષોણીરથસમારૂઢઃ ક્ષોભિણી ક્ષોભદાયકઃ ।
અકારાદિક્ષકારાન્તવર્ણમાલાવિભૂષણઃ ॥ ૧૯૯॥

આખણ્ડલાદિગીર્વાણગણારાધિતપાદુકા ।
ઇનશીતાંશુદહનલોચનશ્રેષ્ટસિદ્ધિદા ॥ ૨૦૦॥

ઈડ્ય ઈષત્સ્મિતમુખી ઉદ્યત્સૂર્યસમપ્રભઃ ।
ઊર્ધ્વામ્નાયસમારૂઢા ઋણત્રયવિમોચકઃ ॥ ૨૦૧॥

રૂપનિર્જિતકન્દર્પો લુબ્ધકીરૂપધારિણી ।
લુબ્ધકાઙ્ગસમાવિષ્ટ એષણારહિતાર્ચિતા ॥ ૨૦૨॥

એકાધિપત્ય ફલદઃ ઐહિકામુષ્મિકપ્રદા ।
ઓકારમન્ત્રસર્વસ્વઃ ઔદાર્યગુણશાલિની ॥ ૨૦૩॥

અમ્બિકાપ્રાણદયિતો અન્નપૂર્ણેશ્વરેશ્વરી ।
અર્ધાદ્રિશિખરાવાસ અર્ધનારીનરેશ્વરી ॥

અર્ધાદ્રિશિખરાવાસાર્ધનારીશ્વરમૂર્તયે નમઃ ॥ ૐ।

ઇતિ અર્ધનારીશ્વરસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by PSA Easwaran

---

*ardhanArIshvarasahasranAmastotram*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*